# भर्तृहरिकृतं शतकत्रयम् । **वैराग्यशतकम्**

vairāgya *n* – бесстрастие; аскетизм, отшельничество; обесцвечивание;

## मङ्गलम्

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभास्वरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयंश्
चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥ (śārdūlavikrīḍita)

cūḍa *f* – хохолок, вихор; остриё, кончик;
uttaṃsita – увенчанный;
candrakalikā *f* – тонкий лунный серп;
√cañc I P. – прыгать;
bhāsvara – сияющий;
vilola – дрожащий, непостоянный;
śalabha *m* - саранча; кузнечик;
daśā *f* – фитиль лампы;
√sphur I P. – блестеть, сверкать; дрожать; метать, бросать;
√sphūrj I P. – грохотать, греметь, реветь;
apāra - безграничный;
prāgbhāra *m* – масса, груда, большое количество:

## तृष्णादूषणम्

tṛṣṇā *f* - алчность, жадность, желание;
dūṣaṇa *n* – порча, причинение ущерба; загрязнение, недостаток, вина, грех, помеха;

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि संतुष्यसि ॥ २ ॥(śārdūlavikrīḍita)

abhimāna *m* – гордость, высокомерие;
ucita – приятный, подходящий;
√jṛmbh I Ā. – разевать пасть;

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन सन्तोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥ ३ ॥ (śārdūlavikrīḍita)

nidhi *m* – сокровище, клад;
ārādhana *n* – успех, удача, начинание, свершение; поклонение, почитание;
śmaśāna *n* – место сожжения трупов;

©cc-by-nc-sa 2004-2025 Н.П.Лихушина
http://galenel.info/sanskrit/18-bhartrihari/nitishatakam-unit.pdf

kāṇa - одноглазый, кривой; пробитый, в дырах
varāṭaka *m* - ракушка, употреблялась как мелкая монета;
sakāma - удовлетворенный, довольный, влюбленный;

खलालापाः सोढाः कथमपि तदाराधनपरैर्
निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥ ४ ॥ (śikhariṇī)

vitta *n* – богатство;
stambha *m* - столб, колонна; высокомерие, упрямство;
āśā *f* – желание; надежда;

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं म्लानव्रीडैर्निजगुणकथापातकमपि ॥ ५ ॥ (śikhariṇī)

bisinī *f* – лотос;
vy-ava√sā (vi-ava√sā или vi-ava√so IV P. p.p. vyavasita) - предпринимать, решаться, хотеть;
vigalita – исчезнувший, отплывший;
viveka *m* – различение, рассмотрение, отделение;
āḍhya - богатый, зажиточный, обильный;
pātaka *n* - грех, преступление, потеря;

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः
सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः ।
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शम्भोः पदं
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥ ६ ॥ (śārdūlavikrīḍita)

भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः ॥७॥ (indravajrā)

वलिभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ८ ॥ (śloka)

√śithilāya *den.* Ā. – слабеть;
√taruṇāya *den.* Ā.– молодеть, расти;

निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः

समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।

शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने

अहो मूढः कायस्तदपि मरणापायचकितः ॥ ९ ॥ (śikhariṇī)

bahumāna *m* – высокое мнение, глубокое уважение;
ni√vart I Ā. - возвращаться; отворачиваться, освобождаться от (+Abl) исчезать;
sapadi *adv.* - одновременно;
cakita *n* - страх, испуг;

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला

रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।

मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी

तस्याः परगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ १० ॥ (śārdūlavikrīḍita)

taraṅga *m* – волна, зыбь;
ākula – полный; наполненный; смущенный;
vitarka *m* – сомнение, предположение;
āvarta *m* – водоворот;
taṭa *m* – склон, берег;
prottuṅga – очень высокий, поднятый;

विषयपरित्यागविडम्बनम्

viḍambana *n* – высмеивание, издевательство;

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं

विपाकः पुण्यानां जनयति भयं मे विमृशतः ।

महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया

महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ ११ ॥ (śikhariṇī)

vi√marś VI P. – касаться, чувствовать; пробовать, изучать, исследовать;
ogha *m* - множество, большое количество;
viṣaya *m* – предмет, тема; объект чувств (их 5 – rūpa, śabda, gandha, rasa, sparśa); объекты привязанности; сфера деятельности;

अवश्यं यातारश्चिरतरमुषित्वापि विषया

वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।

व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः

स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥ १२ ॥ (śikhariṇī)

viyoga *m* – разлука;
bheda *m* – разделение; изменение; разница, различие;
svātantrya *n* – свобода, независимость, самостоятельность
paritāpa *m* – жар; горе, страдание;

©cc-by-nc-sa 2004-2025 Н.П.Лихушина
http://galenel.info/sanskrit/18-bhartrihari/nitishatakam-unit.pdf

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं

यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।

संप्राप्तान्न पुरा न संप्रति न च प्राप्तौ दृढप्रत्ययान्

वाञ्छामात्रपरिग्रहानपि परित्यक्तुं न शक्ता वयम् ॥ १३ ॥ (śārdūlavikrīḍita)

bhāñji – участвующий, связанный, наслаждающийся;
ekāntatas *adv.* – на одном месте, в стороне; исключительно, совершенно, совсем;
saṃprati *adv.* - теперь, в данное время;

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायताम्

आनन्दाश्रुकणान्पिबन्ति शकुना निःशङ्कमङ्केशयाः ।

अस्माकं तु मनोरथोपरचितप्रासादवापीतट-

क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ १४ ॥ (śārdūlavikrīḍita)

kandara *n* – пещера;
kaṇa *m* – зерно, крупинка; капля, кусочек;
niḥśaṅka – лишенный страха или сомнений; беззаботный, беспечный;
kānana *n* – лес;
keli *m, f* – игра, развлечение, шутка;

भिक्षाशनं तदपि नीरसमेकवारं

शय्या च भूः परिजनो निजदेहमात्रम् ।

वस्त्रं विशीर्णशतखण्डमयी च कन्था

हा हा तथापि विषया न परित्यजन्ति ॥ १५ ॥ (vasantatilakā)

nīrasa – безвкусный;
viśīrṇa (p.p. *от* vi√śṝ) – разрушенный, ослабленный; разогнанный, расколотый, разорванный;
kanthā *f* – лоскут, обрывок, клок; тряпка, лохмотья, заплатанная одежда;

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ

मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।

स्रवन्मूत्रक्लिन्नं करिवरशिरःस्पर्धि जघनं

मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ १६ ॥ (śikhariṇī)

śleṣman *m* – слизь, мокрота;
āgāra *n* – дом, жилище;
√sru I P. – течь;
mūtra *n* – моча;
spardhin – спорящий с к.-л.;
jaghana *m* – зад, ягодицы;

एको रागिषु राजते प्रियतमादेहार्धहारी हरो
नीरागेषु जनो विमुक्तललनासङ्गो न यस्मात्परः ।
दुर्वारस्मरबाणपन्नगविषव्यासङ्गमुग्धो जनः
शेषः कामविडम्बितान्न विषयान्भोक्तुं न मोक्तुं क्षमः ॥ १७ ॥ (śārdūlavikrīḍita)

lalanā *f* – кокетка, игривая женщина;
vāra *m* – множество, масса, толпа;
vyāsaṅga *m* - привязанность, склонность;
viḍambita – оскверненный, осмеянный;

अजानन्दाहात्म्यं पततु शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ।
विजानन्तोऽप्येते वयमिह विपज्जालजटिलान्
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ १८ ॥ (śikhariṇī)

śalabha *m* – кузнечник, саранча;
baḍiśa *m, n* – рыболовный крючок;
piśita *n* - разрезанное мясо;
jaṭila – увенчанный;

तृषा शुष्यत्यास्ये पिबति सलिलं शीतमधुरं
क्षुधार्तः संशालिं कवलयति मांसादिकलितम् ।
प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधूं
प्रतीकारं व्याधेः सुखमिति विपर्यस्यति जनः ॥ १९ ॥ (śikhariṇī)

śāli *m* – рис, зерно
√kavalaya *den.* – глотать;
kalita – украшенный, снабженный ч.-л.
pratīkāra *m* – снадобье от болезни; противодействие;
vyādhi *m* – болезнь;
vipary√as IV P. - перевертывать, менять, заменять;

तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः सम्पदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु संन्यस्यति ॥ २० ॥ (śārdūlavikrīḍita)

tuṅga – высокий;
anaśvara – постоянный, неувядаемый, непреходящий;
kārā *f* – тюрьма;
bhaṅgura – непрочный, ломкий, преходящий, непостоянный;

## याञ्चादूषणम्

yācñā *f* - просьба; попрошайничество;

दीना दीनमुखैः स्वकीयशिशुकैराकृष्टजीर्णाम्बरा

क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी ।

याञ्चाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं

को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ २१ ॥ (śārdūlavikrīḍita)

dīna – грустный, печальный; жалкий, убогий;
vidhura – лишенный ч.-л., одинокий, печальный;
gehinī *f* – хозяйка дома; жена;
bhaṅga *m* – прерывание, помеха;
gadgada *n* – заикание, нечленораздельное бормотание;
√truṭ IV P. - разбивать, расчленять;
√lī I P. (p.p. vilīna) – прятаться, исчезать, растворяться;
jaṭhara *n* – живот, нутро;

अभिमतमहामानग्रन्थिप्रभेदपटीयसी

गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।

विपुलविलसल्लज्जावल्लीवितानकुठारिका

जठरपिठरी दुष्पूरेयं करोति विडम्बनम् ॥ २२ ॥ (hariṇī)

vipula – большой, многочисленный, значительный;
kuṭhārika *m* – дровосек (kuṭhāra *m* - топор);
piṭharī *f* – горшок, чан;
viḍambana *n* – подражание, копирование, насмешка, унижение;

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालीं कपालीम्

आदाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे ।

द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो

मानी प्राणैः सनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥ २३ ॥ (sragdharā)

paṭa *m* – ткань, материя;
pālī *f* – край, кромка;
kapālī *f* – чаша для подаяний;
hutabhuj *m* – огонь (букв. пожирающий жертвы);
dhūmra – дымчатый, серый, тусклый;
kulya *m* – знатный человек;

गङ्गातरङ्गकणशीकरशीतलानि

विद्याधराध्युषितचारुशिलातलानि ।

स्थानानि किं हिमवतः प्रलयं गतानि

यत्सावमानपरपिण्डरता मनुष्याः ॥ २४ ॥ (vasantatilakā)

taraṅga *m* – волна;
kaṇa *m* – зерно, кусочек, частица, капля;
śīkara *m* – морось, мелкий дождь;
vidyādhara *m* – полубожественные волшебные существа, добрые духи воздуха из свиты Индры или Куберы, обитают между небом и землей;

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ।
वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां
दुःखोपात्ताल्पवित्तस्मयपवनवशानर्तितभ्रूलतानि ॥ २५ ॥ (sragdharā)

kanda *m* – корень;
kandara *n* – пещера, ущелье, горная долина;
nirjhara *m, n* – водопад;
valkalin – имеющий кору; носящий одежду из древесной коры;
prasabham *adv.* – сильно, страстно, назойливо;
praśraya *m* – опора, поддержка; вежливость, скромность;
upātta – полученный, приобретенный;

पुण्यैर्मूलफलैः प्रियप्रणयिनीं वृत्तिं कुरुष्वाधुना
भूशय्यां नवपल्लवैरकृपणैरुत्तिष्ठ यामो वनम् ।
क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥ २६ ॥ (śārdūlavikrīḍita)

akṝpaṇa – беспечальный, весёлый;
viveka *m* – отделение, различение, проверка; рассудительность;
vikāra *m* – изменение, повреждение, болезнь;
vihvala – истощенный, угнетённый;

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः ॥ २७ ॥ (śikhariṇī)

kheda *m* – утомление, усталость;
kṣitiruh *m* – дерево (*букв.* растущее из земли);

ये वर्धन्ते धनपतिपुरः प्रार्थनादुःखभाजो
ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः ।
तेषामन्तःस्फुरितहसितं वासराणां स्मरेयं

ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ २८ ॥ (mandākrāntā)

vāsara *m, n* – день;
kuhara *n* – пещера, нора;
grāvan *m* – камень;

ये सन्तोषनिरन्तरप्रमुदितास्तेषां न भिन्ना मुदो
ये त्वन्ये धनलुब्धसङ्कुलधियस्तेषां न तृष्णाहता ।
इत्थं कस्य कृते कृतः स विधिना तादृक्पदं सम्पदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ २९ ॥ (śārdūlavikrīḍita)

saṅkula – занятый ч.-л., исполненный (желаний);
sampad *f* – успех, удача; величие, великолепие;

भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वदा
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ।
सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोः सत्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥ ३० ॥ (śārdūlavikrīḍita)

mathana *n* – трение; уничтожение; помеха;
dainya *n* – подавленность, удрученность; нищета, убожество;
anvaham *adv.* – день за днем;
satra (sattra) *n* – большое жертвоприношение сомы (продолжительностью от 13 до 100 дней);
nidhi *m* – сокровище, клад; совокупность ч.-л.;

## भोगास्थैर्यम्

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यं एवाभयम् ॥ ३१ ॥ (śārdūlavikrīḍita)

vādin *m* – учитель, знаток, участник спора или дискуссии;
kṛtānta *m* - случай, судьба, смерть;

आक्रान्तं मरणेन जन्म जरसा चात्युज्ज्वलं यौवनं
सन्तोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैर्
अस्थैर्येण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥ ३२ ॥(śārdūlavikrīḍita)

prauḍha – самоуверенный, смелый, полный ч.-л.;

vibhrama *m* - шаткость; непостоянство; кокетство;

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ।
जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्
तत्किं तेन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम् ॥ ३३ ॥ (śārdūlavikrīḍita)

ādhi *m* – забота, тревога, беспокойство, боль;
un√mūl *den.* P. - искоренять, уничтожать;
ātmasāt √kar VIII U. – присваивать, делать своим;
niraṅkuśa – не ограниченный, лишенный оков, полностью свободный;

भोगास्तुङ्गतरङ्गभङ्गतरलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं स्फूर्तिः प्रियासु स्थिता ।
तत्संसारमसारमेव निखिलं बुद्धा बुधा बोधका
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ ३४ ॥ (śārdūlavikrīḍita)

tuṅga – высокий;
taraṅga *m* – волна;
tarala – дрожащий, шаткий, непостоянный; *m* волна;
sphūrti *f* - появление, проявление; дрожь, трепетание, вибрация;
asāra - непригодный, неценный;
peśala – красивый, украшенный;

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद्भङ्गुरम् ।
लीला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥ ३५ ॥ (śārdūlavikrīḍita)

cañcala - подвижный, непостоянный, ветренный;
vi√ghaṭṭ I Ā. - разбивать; трясти;
paṭalī *f* – крыша; покров, покрытие;
tanubhṛt - имеющий тело, воплощенный, человек;

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीर्
अर्थाः सङ्कल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥ ३६ ॥ (sragdharā)

kallola *m* – волна;
kalpa - способный; даровитый; возможный; подобный;

pūga *m* – союз; множество;
upa√guh I U. – прятаться, скрывать; обнимать;
pra√ṇī I U. - вести; предлагать, применять, определять, совершать; желать, любить;

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे
कान्ताविश्लेषदुःखव्यतिकरविषमो यौवने चोपभोगः ।
वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥ ३७ ॥ (sragdharā)

vyatikara *m* - смешение, соединение; несчастье, беда;

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहं ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ ३८ ॥ (vasantatilakā)

pari√tarj P. *caus.* – угрожать;

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवस्
तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टतैः ।
आशापाशशतोपशान्तिविशदं चेतःसमाधीयतां
कामोत्पत्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥ ३९ ॥ (śārdūlavikrīḍita)

upaśānti *f* – прекращение, тишина, спокойствие;
viśada - чистый, светный, понятный;

ब्रह्मेन्द्रादिमरुद्गणांस्तृणकणान्यत्र स्थितो मन्यते
यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः ।
भोगः कोऽपि स एव एक परमो नित्योदितो जृम्भते
भोः साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥ ४० ॥ (śārdūlavikrīḍita)

kaṇa *m* – крупинка, капля, искра, частица;
svāda *m* – вкус, удовольствие, наслаждение;
vibhava *m* – власть, сила, могущество, богатство;
√jṛmbh I Ā. – зиять, раскрывать рот, раскрываться;

## कालमहिमा

सा रम्या नगरी महान्स नृपतिः सामन्तचक्रं च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।
उद्वृत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥ ४१ ॥ (śārdūlavikrīḍita)

ud√vart I Ā. - выходить; пропадать, исчезать;
nivaha *m* - количество, толпа, стая;
bandin *m* – певец, бард;

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थं नेयौ रजनिदिवसौ लोलयन्द्वाविवाक्षौ
कालः कल्यो भुवनफलके क्रीडति प्राणिशारैः ॥ ४२ ॥ (mandākrāntā)

naya *m* – вид игры, кости или фигуры для этой игры;
√lolaya P. (*caus. от* √lul) - приводить в движение; беспокоить;
kalya - искусный, ловкий; здоровый, сильный; умный, сообразительный;
phalaka *n* – игральная доска;
śāra *m* – фигура (в шахматах);

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ४३ ॥ (śārdūlavikrīḍita)

vyāpāra *m* – занятие, занятость;
madirā *f* - опьяняющий напиток;

रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तभूतविषयैरित्थं विधेनामुना
संसारेण कदर्थिता वयमहो मोहान्न लज्जामहे ॥ ४४ ॥ (śārdūlavikrīḍita)

nibhṛta - наполненный ч.-л.;
kadarthita – отвергнутый, презираемый, бесполезный;

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये

स्वर्गद्वारकवाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ ४५ ॥ (śārdūlavikrīḍita)

vāṭa *m* – ограда, огороженное место;
payodhara *m* – облако; женская грудь;
ā√liṅg I U. – обнимать;
kuṭhāra *m* – топор;

नाभ्यस्ता प्रतिवादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥ ४६ ॥ (śārdūlavikrīḍita)

vinīta – ведомый, обученный; вежливый, воспитанный; благонравный;
vṛnda *n* - множество, стадо;
khaḍga *m* – меч;
dalana - разрывающий;

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता ।
आलोलायतलोचनाः युवतयः स्वप्नेऽपि नालिङ्गिताः
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेर्यते ॥ ४७ ॥ (śārdūlavikrīḍita)

kalaṅka *m* – пятно;
lolupatā *f* – стремление к ч.-л.;

वयं येभ्यो जाताश्चिरपरिगता एव खलु ते
समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः ।
इदानीं एते स्मः प्रतिदिवसमासन्नपतना
गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥ ४८ ॥ (śikhariṇī)

sikatila – песчаный;

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥ ४९ ॥ (śārdūlavikrīḍita)

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनूर्
नरः संसारान्ते विशति यमधानीयवनिकाम् ॥ ५० ॥ (śikhariṇī)

kāmarasika – сладострастный, чувственный;
valī *f* – морщины;
yamadhānī *f* – жилище бога смерти Ямы;
yavanikā *f* – ширма из ткани, вуаль;

यतिनृपतिसंवादः

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः ॥ ५१ ॥(śārdūlavikrīḍita)

ekāntatas *adv.* - на одном месте, в стороне; исключительно; совершенно, совсем;

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं
शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं नः ।
सेवन्ते त्वां धनाढ्या मतिमलहतये मामपि श्रोतुकामा
मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन्गतोऽस्मि ॥ ५२ ॥ (sragdharā)

yāvadartham *adv.* – сколько нужно, по мере необходимости;
pāṭava *n* – проницательность, сообразительность;
āsthā *f* – потребность в ч.-л.; забота о к.-л. (+Loc.);

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥ ५३ ॥ (mālinī)

dukūla *m* - одежда из тонкой ткани;
viśāla - обширный, растянутый, далекий; сильный, могучий;

फलमलमशनाय स्वादु पानाय तोयं
शयनमवनिपृष्ठे वाससी वल्कले च ।
नवघनमधुपानभ्रान्तसर्वेन्द्रियाणाम्
अविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ ५४ ॥ (mālinī)

अश्नीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ ५५ ॥ (śloka)

āśā *f* - сторона света;

न नटा न विटा न गायका न च सभ्येतरवादचुञ्चवः ।
नृपमीक्षितुमत्र के वयं स्तनभारानमिता न योषितः॥ ५६ ॥ (viyoginī)

viṭa *m* – мошенник, плут, повеса;
cuñcu – известный, знаменитый;
stana *m* – женская грудь;
yoṣit *f* – женщина;

(вариант 2)

न नटा न विटा न गायका न परद्रोहनिबद्धबुद्धयः।
नृपसद्मनि नाम के वयं कुचभारानमिता न योषितः॥ ५६ ॥ (viyoginī)

droha *m* - вражда; обида, оскорбление;
kuca *m* – женская грудь;

विपुलहृदयैर्धन्यैः कैश्चिज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ ५७ ॥ (hariṇī)

vi√dhar I P. – разделять;
madajvara *m* – лихорадка страсти или гордости;

अभुक्तायां यस्यां क्षणमपि न जातं नृपशतैर्
भुवस्तस्या लाभे क इव बहुमानः क्षितिभृताम् ।
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ ५८ ॥ (śikhariṇī)

avayava *m* - часть, член (тела), ветвь (дерева);

leśa *m* – частица, атом; кусочек, небольшая часть ч.-л.;

मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणुः
स्वांशीकृत्य स एव संयुगशतै राज्ञां गणा भुञ्जते ।
ये दद्युर्ददतोऽथवा किमपरं क्षुद्रा दरिद्रा भृशं
धिग्धिक्तान्पुरुषाधमान्धनकणान्वाञ्छन्ति तेभ्योऽपि ये ॥ ५९ ॥ (śārdūlavikrīḍita)

rekhā *f* – черта, линия, рисунок;
valayita – окруженный, ограниченный ч.-л.;
saṃyuga *n* - битва, сражение;

स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं
कपालं यस्योच्चैर्विनिहितमलङ्कारविधये ।
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ ६० ॥ (śikhariṇī)

madana *m* – бог Кама;
pravaṇa - склоненный;

## मनःसंबोधनम्

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलिलम् ।
प्रसन्ने त्वय्यन्तःस्वयमुदितचिन्तामणिगणो
विविक्तः सङ्कल्पः किमभिलषितं पुष्यति न ते ॥ ६१ ॥ (śikhariṇī)

kalila – исполненный, наполненный;

परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यतां
स्वयं भवति यद्यथा भवति तत्तथा नान्यथा ।
अतीतमननुस्मरन्नपि च भाव्यसङ्कल्पयन्न्
अतर्कितगमागमाननुभवामि भोगानहम् ॥ ६२ ॥ (pṛthvī)

mudhā *adv.* - напрасно, тщетно;

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय
श्रेयोमार्गमनेकदुःखशमनव्यापारदक्षं क्षणात् ।
स्वात्मीभावमुपैहि संत्यज निजां कल्लोललोलं गतिं

मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ ६३ ॥ (śārdūlavikrīḍita)

āyāsaka – вызывающий усталость, заставляющий делать усилие;
ātmībhāva *m* – стать частью Высшего Атмана;

मोहं मार्जय तामुपार्जय रतिं चन्द्रार्धचूडामणौ

चेतः स्वर्गतरङ्गिणीतटभुवामासङ्गमङ्गीकुरु ।

को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु च

ज्वालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः ॥ ६४ ॥ (śārdūlavikrīḍita)

upārjaya (upa√arjaya) *caus.* – добывать, приобретать;
taraṅgiṇī *f* - река;

चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया

भूपालभ्रुकुटीकुटीविहरणव्यापारपण्याङ्गनाम् ।

कन्थाकञ्चुकिनः प्रविश्य भवनद्वाराणि वाराणसी-

रथ्यापङ्क्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥ ६५ ॥ (śārdūlavikrīḍita)

ramā *f* – счастье, богатство, богиня Лакшми;
āsthā *f* – забота; согласие, обещание;
viharaṇa *n* - перемещение;

अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः

पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।

यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं

नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ६६ ॥ (mandākrāntā)

sarasa – свежий, новый; красивый, преисполненный чувства;
raṇita *n* – звучание;
cāmara *n* – опахало из хвоста яка или буйвола;
lampaṭa – жадный, алчный;

प्राप्ताः श्रियः सकलकामदुघास्ततः किं

न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।

सम्पादिताः प्रणयिनो विभवैस्ततः किं

कल्पं स्थितास्तनुभृतां तनवस्ततः किम् ॥ ६७ ॥ (vasantatilakā)

praṇayin – любимый; возлюбленный;
vibhava *m* – власть, сила, могущество, богатство;

भक्तिर्भवे मरणजन्मभयं हृदिस्थं

स्नेहो न बन्धुषु न मन्मथजा विकाराः ।
संसर्गदोषरहिता विजना वनान्ता
वैराग्यमस्ति किमतः परमर्थनीयम् ॥ ६८ ॥ (vasantatilakā)

saṃsarga *m* - общение, соприкосновение;

तस्मादनन्तमजरं परमं विकासि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणलोकमता भवन्ति ॥ ६९ ॥ (vasantatilakā)

vikāsin – раскрывающийся, открытый, цветущий;
vikalpa *m* – ошибка, заблуждение; сомнение; различие;
anuṣaṅgin – привязанный к ч.-л.;

पातालमाविशसि यासि नभो विलङ्घ्य
दिङ्मण्डलं भ्रमसि मानस चापलेन ।
भ्रान्त्यापि जातु विमलं कथमात्मलीनं
न ब्रह्म संसरसि निर्वृतिमेषि येन ॥ ७० ॥ (vasantatilakā)

nirvṛti *f* - внутренняя удовлетворенность; покой, спокойствие;

### नित्यानित्यविचारः

vicāra *m* - обдумывание, исследование;

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।
मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रवेशकलनं शेषैर्वणिग्वृत्तिभिः ॥ ७१ ॥ (śārdūlavikrīḍita)

kuṭī *f* - хижина, шалаш;
racanā *f* - творение, создание;

यतो मेरुः श्रीमान्निपतति युगान्ताग्निदलितः
समुद्राः शुष्यन्ति प्रचुरमकरग्राहनिलयाः ।
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥ ७२ ॥ (śikhariṇī)

√dal I P. - взорваться, лопнуть;

pracura – полный, обильный;
nilaya *n* – убежище, приют; жилище, местопребывание;
dharaṇidhara *m* - гора, эпитет Вишну;
kā vārtā (+ Loc.) – какие разговоры могут быть о ч.-л.;
karikalabha *m* – слоненок;

गात्रं सङ्कुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिर्
दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ।
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ॥ ७३ ॥ (śārdūlavikrīḍita)

āvali *f* – полоса, ряд, строка;
badhiratā *f* – глухота;
lālā *f* – слюна;

वर्णं सितं झटिति वीक्ष्य शिरोरुहाणां
स्थानं जरापरिभवस्य तदा पुमांसम् ।
आरोपितास्थिशकलं परिहृत्य यान्ति
चण्डालकूपमिव दूरतरं तरुण्यः ॥ ७४ ॥ (vasantatilakā)

jhaṭiti *adv.* – мгновенно, сразу;
paribhava *m* – унижение, презрение;
śakala *n, m* - щепка, черепок, осколок;

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥७५॥ (śārdūlavikrīḍita)

saṃdīpta – горящий;
khanana *n* - копание;
pratyudyama *m* - противовес, баланс; уравновешивающее усилие;

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः सविनयम् ।
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसान्
न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ७६ ॥ (śikhariṇī)

ogha *m* - прилив, поток, множество;

दुराराध्याश्चामी तुरगचलचित्ताः क्षितिभुजो
वयं तु स्थूलेच्छाः सुमहति फले बद्धमनसः ।
जरा देहं मृत्युर्हरति दयितं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषेऽन्यत्र तपसः ॥ ७७ ॥ (śikhariṇī)

ārādhya - благосклонный, почитаемый;
diyata – любимый, дорогой;

माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-
पूतग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ॥ ७८ ॥ (śārdūlavikrīḍita)

grāvan *m* – камень;
taṭī *f* – склон, откос;
kuñja *m* – место, заросшее растениями; беседка;

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली
रम्यं साधुसमागमागतसुखं काव्येषु रम्याः कथाः ।
कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुनः ॥ ७९ ॥ (śārdūlavikrīḍita)

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।
किं तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥ ८० ॥ (śārdūlavikrīḍita)

harmya *n* – дом, дворец;
vyālola – дрожащий, трясущийся, машущий;

## शिवार्चनम्

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृङ्
नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा ।

योऽयं धत्ते विषयकरिणीगाढगूढाभिमान-

क्षीबस्यान्तःकरणकरिणः संयमालानलीलाम् ॥ ८१ ॥ (mandākrāntā)

gāḍha - глубокий, сильный, стремительный;
gūḍha *n* – темнота, тьма; тайна, секрет
kṣība - опьяненный, взволнованный;
antaḥkaraṇa *n* - внутренний орган; местонахождение мыслей и чувств (о душе);
ālāna *n* – столб для привязи слонов;

यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं

सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ।

मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृशन्

न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ ८२ ॥ (śikhariṇī)

kārpaṇya *n* - бедность; скупость; слабость; сострадание;
pariṇati *f* – сгибание, превращение, развитие; следствие, результат, завершение;
saṃvāsa *m* - совместная жизнь;
spanda *m* – волнение, трепет, движение;

जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं

हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना ।

किं युक्तं सहसाभ्युपैति बलवान्कालः कृतान्तोऽक्षमी

हा ज्ञातं मदनान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्यो गतिः ॥ ८३ ॥ (śārdūlavikrīḍita)

vandhya – бесплодный, бесполезный;
kṛtānta *m* - случай, судьба, эпитет Ямы;
aṅghri *m* - нога, стопа;

महेश्वरे वा जगतामधीश्वरे

जनार्दने वा जगदन्तरात्मनि ।

न वस्तुभेदप्रतिपत्तिरस्ति मे

तथापि भक्तिस्तरुणेन्दुशेखरे ॥ ८४ ॥ (vaṃśastha)

vastubheda *m* – фактическое или существенное различие;

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने

सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ।

भवाभोगोद्विग्नाः शिव शिव शिवेत्युच्चवचसः

कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदृशः ॥ ८५ ॥ (śikhariṇī)

sphāra – широкий, большой, великий, обильный, громкий; *m* удар, пощечина;
pulina *n* – низкий песчаный берег, отмель;
ābhoga *m* - изгиб; полнота; объем; сила, мощь;

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः
स्मरन्तः संसारे विगुणपरिणामां विधिगतिम् ।
वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणास्
त्रियामा नेष्यामो हरचरणचिन्तैकशरणाः ॥ ८६ ॥ (śikhariṇī)

sarvasva *n* - всё имущество;
triyāmā *f* - ночь;
pariṇata – изогнувшийся, склонившийся; спелый; полный (о луне), заходящий (о солнце);

कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ ८७ ॥ (śikhariṇī)

rodhas *n* – вал, насыпь, берег;

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे
दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ ८८ ॥ (sragdharā)

kuhara *n* – пещера;
paryaṅka *m* – ложе;

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ८९ ॥ (śloka)

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण संतुष्यतां
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ।
अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशाम्
अध्वा कोऽपि शिवप्रसादसुलभः सम्पत्स्यते योगिनाम् ॥ ९० ॥ (śārdūlavikrīḍita)

ज्ञानं सतां मानमदादिनाशनं

केषांचिदेतन्मदमानकारणम्।

स्थानं विविक्तं यमिनां विमुक्तये

कामातुराणामतिकामकारणम् ॥९०*१॥ (indravaṃśa)

māna *m, n* – гордость, гнев;
kāraṇa *n* – причина, мотив;
yamin - обузданный; сдерживающий (чувства);
ātura - больной, страдающий; желающий ч.-л.;

अवधूतचर्या

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी

नैश्चिन्त्यं निरपेक्षभैक्ष्यमशनं निद्रा श्मशाने वने ।

स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा

स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम् ॥ ९१ ॥ (śārdūlavikrīḍita)

jarjara – гниющий, хилый, истрепанный, разорванный;
niraṅkuśa – не знающий оков, неограниченный, полностью свободный;

ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः ।

शफरीस्फुर्तेनाब्धिः क्षुब्धो न खलु जायते ॥ ९२ ॥ (śloka)

śapharī *f* – вид рыбы;

मातर्लक्ष्मि भजस्व कंचिदपरं मत्काङ्क्षिणी मा स्म भूर्

भोगेषु स्पृहयालवस्तव वशे का निःस्पृहाणामसि ।

सद्यः स्यूतपलाशपत्रपुटिकापात्रैः पवित्रीकृतैर्

भिक्षावस्तुभिरेव सम्प्रति वयं वृत्तिं समीहामहे ॥ ९३ ॥ (śārdūlavikrīḍita)

spṛhayālu – желающий, жадный, алчный;
sadyas *adv.* – ежедневно;
syūta (p.p. от √siv) - сшитый;
puṭikā *f* – воронка из листа;
sam√īh I Ā. – стремиться, желать;

महीशय्या शय्या विपुलमुपधानं भुजलतां

वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।

स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः

सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ ९४ ॥ (śikhariṇī)

vitāna *m, n* – покрывало; балдахин;
vyajana *n* – опахало, веер;
anukūla – благоприятный, способствующий;

भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा
हानादानविविक्तमार्गनिरतः कश्चित्तपस्वी स्थितः ।
रथ्याकीर्णविशीर्णजीर्णवसनः संप्राप्तकन्थासनो
निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ॥ ९५ ॥ (śārdūlavikrīḍita)

चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः
किं वा तत्त्वविवेकपेशलमतिर्योगीश्वरः कोऽपि किं ।
इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनैर्
न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥ ९६ ॥ (śārdūlavikrīḍita)

mukhara - разговорчивый;

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं
व्यालानां पशवस्तृणाङ्कुरभुजः सृष्टाः स्थलीशायिनः ।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ ९७ ॥ (śārdūlavikrīḍita)

vyāla *m* – хищник; змея;

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्येषु ते निर्विशङ्काः
कण्डूयन्ते जरठहरिणाः स्वाङ्गमङ्गे मदीये ॥ ९८ ॥ (mandākrāntā)

jaraṭha – старый;
√kaṇḍūya *den.* – тереть, скрести, чесаться;

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं
विस्तीर्णं वस्त्रमाशादशकमचपलं तल्पमस्वल्पमुर्वी ।
येषां निःसङ्गताङ्गीकरणपरिणतस्वान्तसंतोषिणस्ते
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ ९९ ॥ (sragdharā)

āśā *f* - сторона света, пространство;
talpa *m* - ложе, постель;

aṅgīkaraṇa *m* - признание, принятие;
dainya *n* - нищета; подавленность;

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ १०० ॥ (śārdūlavikrīḍita)

medinī *f* – земля;
apās (apa√as) IV P. - отбрасывать, покидать;
√lī I P. – таять, плавиться, растворяться;

इति भर्तृहरिविरचितवैराग्यशतकं समाप्तम्